क्र० – 78

परिग्रहण संख्या – 2001

तन्त्र सार संग्रह

2001

पूर्ण

(2)

अथतंत्रसारमूलारंभः
१२

पी० सं० 2001

क्र० - 78

तंत्र०
१ श्रीगणेशायनमः श्रीमदानंदतीर्थभगवत्पादाचार्येभ्योनमः हरिः ॐ जयत्यजन्मभवेन्द्रादिवंदितःक
मलापतिः अनंतविभवानंदशक्तिज्ञानादिसद्गुणः १ विधिंविधायसर्गादौतेनपृष्टोब्जलोचनः
आहदेवोरमोत्संगविलसत्तारपल्लवः २ अहमेकोखिलगुणोवाचकःप्रणवोमम अकाराद्युति
ज्ञांतांतःसोयमष्टाक्षरोमतः ३ सविश्वतैजसप्राज्ञतुरीयात्मांतरात्मनां परमात्मज्ञानात्मयुजांम
द्रूपाणांचवाचकः ४ तद्रूपभेदाःपंचाशन्मूर्तयोममचापराः पंचाशद्वर्णवाच्यास्तावर्णास्ताराणे
भेदिताः ५ द्विरष्टपंचकचेतुःपंचेसेवाष्टवर्गगाः अजआनंदइंद्रेशउग्रऊर्जेऋतंभरः ६ ऋ
घलृशोलृजिरेकात्मैरऔजोभद्रौरसः अंतोर्धगर्भःकपिलःखपतिर्गरुडासनः ७ धर्मोङःसार
श्वार्वगःश्रष्टुंद्रोगम्योजनार्दनः स्तादिताद्रिर्जःमशंकीठकलोडरकोढरी ८ णात्मातारस्थरोदंडी
धन्वीनम्यःपरःफली बलीभगोमनुर्यज्ञोरामोलक्ष्मीपतिर्वरः ९ शांतसंवित्षड्गुणश्चसारात्माहं
सल्लालुको पंचाशन्मूर्तयस्त्वेताममाकारादिलक्षकाः १० नारायणाष्टाक्षरश्च ताराष्टाक्षरभे
दवान् आद्यैस्तारचतुर्वर्णैर्भिन्नाव्याहृतयःक्रमात् ११ अनिरुद्धादिकास्तासांदेवताःक्रमेणवा १
वासु

ताश्चतुर्मूर्तयस्त्वेताद्वादशार्णपदोदिताः १२ नारायणाष्टाक्षराच्चव्याहृतिभ्यस्तथैवच विभे
दाद्वादशार्णानांकेशवाद्याश्चदेवताः १३ नारायणाक्षराच्चव्याहृतित्रिगुणात्पुनः वेदमा श०२
ताचगायत्रीद्विगुणाद्वादशाक्षरात् १४ चतुर्विंशन्मूर्तयोस्याःकथिताःवर्णदेवताः तद्भेदः
पौरुषंसूक्तंवेदाःपुरुषसूक्तगाः १५ वैदिकाःसर्वशब्दाश्चतस्मात्सर्वाभिधोस्म्यहं पंचाशद्व
र्णभिन्नाश्चसर्वशब्दाअतोपिच १६ ऋषिश्चदेवतैकोहंताराद्रीनांविशेषतः छंदोमदीयागाय
त्रीताराष्टाक्षरयोर्मता १७ उद्यद्भास्वत्समाभासश्चिदानंदैकदेहवान् चक्रशंखगदापद्मधरो
ध्येयोहमीश्वरः १८ लक्ष्मीधराभ्यामाश्लिष्टःस्वमूर्तिगणमध्यगः ब्रह्मवायुशिवाहीशविपैः
शक्रादिकैरपि १९ सेव्यमानोधिकंभक्त्यानित्यनिःशेषशक्तिमान् मूर्तयोष्टावपिध्येयाश्चक्र
शंखवराभयैः युक्ताःप्रदीपवर्णाश्चसर्वाभरणभूषिताः तादृग्रूपाश्चपंचाशज्ज्ञानमुद्राभयो
युताः २१ टंकीदंडीचधन्वीचतत्तद्युक्तास्तुवामतः वासुदेवादिकाःशुक्लरक्तपीतासितोज्ज्वलाः
२२ चक्रशंखगदाब्जैतःप्रथमोमुसलीहली सचक्रशंखस्त्वपरस्तृतीयःशार्ङ्गबाणवान् २३ स

तंत्र· २

चक्रशंखस्तुर्यस्तुचक्रशंखासिचर्मवान् केशवोमधुसूदनःसंकर्षणदामोदरौ २४ सवासु
देवःप्रद्युम्नोदक्षोच्चकरशंखिनः विष्णुमाधवानिरुद्धपुरुषोत्तमाः धोक्षजाः २५ जनार्द
नश्चवामोच्चकरस्थितदरामताः गोविंदश्चत्रिविक्रमःसश्रीधरहृषीकपाः २६ नृसिंहश्चा
च्युतश्चैववामाधःकरशंखिनः वामनःसनारायणःपद्मनाभउपेंद्रकः २७ हरिःकृष्णश्चदक्षा
धःकरेशंखधरामताः शंखचक्रगदापद्मधराश्चैतेहिसर्वशः २८ क्रमव्युत्क्रमयथादिग
दादिव्युत्क्रमतस्तथा अर्धक्रमःसांतरश्चषड्भुषड्द्विरिपूर्विणां २९ वर्णानांदेवतानांचनित्यता
त्क्रमस्ततः व्यक्तिक्रमंत्रसत्त्वेष्वावपेक्षक्रमउच्यते ३० समासव्यासयोगेनव्याप्तीनांच
तुष्टयं सत्वंचांगानितारस्यप्रोच्यंतेद्व्यक्षरस्यच ३१ कृष्णमहावीरद्युसहस्रसहितोल्कका:
चतुर्थ्यंतात्तदादीनिदृष्टथग्रूपाणिनानिच ३२ विष्णोरेवात्मभेदेपितदैश्वर्यात्तदन्यवत् चक्र
शंखवराभीतिहस्तान्येतानिसर्वशः ३३ मूलस्यसवर्णानिकृष्णवर्णाभिरिखोच्यते चतुर्विंश
न्मूर्तयश्चमूलरूपसवर्णकाः ३४ आदिवर्णत्रयंनाभिरुच्छिरस्सुयथाक्रमं न्यसनीयंचतद्वर्ण २

देवताध्यानपूर्वकं ३५ पज्जानुनाभिहृदयवाङ्मूर्धानेत्रकेषुच अष्टाक्षराणांन्यासःस्याव्याप्तती
नांप्रजापतिः ३६ मुनिश्छंदस्तुगायत्रीदेवताभगवान्हरिः उद्यदादित्यवर्णश्चज्ञानमुद्राभयोद्यतः
३७ तारेणव्याप्ततीभिश्चज्ञेयान्यंगानिपंचच नाभिहृत्केषुसर्वेषुचतस्रोव्याप्तीर्न्यसेत् ३८ द्वा
दशार्णस्यजगतीछंदोन्यत्तारवत्स्मृतं अच्छवर्णोभयवरकरोध्येयोमितद्युतिः ३९ पदैर्वा ःस सै
मस्तैश्चज्ञेयान्यंगानिपंचच अष्टाक्षराणांस्थानेषुवाक्कोरुर्वोश्चविन्यसेत् ४० विश्वामित्रस्तुसं
ध्यार्थेतदन्यत्रप्रजापतिः मुनिर्देवश्चसवितानामासद्भवतोहरिः ४१ प्रोद्यदादित्यवर्णश्चस
र्यमंडलमध्यगः चक्रशंखधरोकस्यदोर्द्वयोर्ध्येयएवच ४२ सतारश्चव्याप्ततयोगायत्र्यंगा
निपंचच द्वोःपत्तांश्रिषुसाग्रेषुनाभिहृन्मुखकेषुच ४३ वर्णन्यासश्चकर्तव्यस्तारवन्निखिलं
स्मृतंपंचाशदक्षराणांचपुंसकस्यापिसर्वशः ४४ अनुष्टुभश्चत्रिष्टुप्चछंदोस्यत्रिष्टुभोपि
वा विष्णुर्नारदश्चतुर्थ्यंतोतदद्येतःषडक्षरः ४५ नारवत्सर्वमप्यापिश्यामोध्येयोहरिस्स्वयं
वर्णाएवषडंगानिषण्णयोर्भेदयोगतः ४६ पज्जानुनाभिहृन्नासाकेषुन्यासश्चवर्णैरोः एतेतु

तंत्र·
३

सर्वमंत्राणांमूलमंत्राःविशेषतः ४७ एतद्ज्ञानात्ममलंचज्ञातंसाक्षाद्दृग्गोचरं एतज्जपात्समस्तानां
मंत्राणांजापकोभवेत् ४८ पूज्यश्चभगवान्नित्यंचक्राब्जादिकमंडले हृदयेवाचलेवापिजलेवाके
वलस्थले ४९ अ शास्त्रेणसंपूज्यप्रथमंदेवतांपरां मध्येसव्येगुरुंश्चैवदक्षिणेसर्वदेवताः ५०
पुनःसव्येसर्वगुरून्नाग्नेयादिषुचक्रमात् गरुडंव्यासदेवंचदुर्गांचैवसरस्वती ५१ धर्मंज्ञानंचवै
राग्यमैश्वर्यंचैवकोणगान् तदंतःपूर्वदिक्पूर्वमधर्मादींश्चपूजयेत् ५२ अपूजितापधर्मादि दा
तारस्तेतथाभिधाः निर्ऋतिश्चैवदुर्गाचकामोरुद्रश्चदेवताः ५३ यमवायुशिवेंद्राश्चज्ञेयाधर्मा
दिदेवताः परमःपुरुषोमध्येशक्तिराधाररूपिणी ५४ कूर्मोनंतश्चपृथिवीक्षीरसागरएवच श्वे
तद्वीपोमंडपश्चदिव्यरत्नमयोमहान् ५५ पद्ममत्रयंदेवीरमैवबहुरूपिणी सूर्यसोमहुताशाश्च
पद्मेश्रीस्त्रिगुणात्मिका आत्मांतरात्मपरमज्ञानात्मानश्चमूर्तयः विमलोत्कर्षणीज्ञानाक्रिया
योगातथैवच ५७ प्रह्वीसत्यातथेशानानुग्रहाचेतिशक्तयः अष्टदिक्षुचमध्येचस्वरूपाण्येव
ताहरेः ५८ ततोनंतंयोगपीठस्वरूपंपूजयेद्धरेः तत्रावाह्यहरिंचार्घ्यपाद्यमाचमनीयकं ५९ ३

स्त्वा

मधुपर्कंपुनश्चाचामस्नानंवासोविभूषणं उपवीतासनेदत्वागंधपुष्पेतथैवच ६० लक्ष्मीधरे
यजेत्तत्रपार्श्वयोरुभयोर्हरेः तद्दक्षिणस्थंद्वारदिक्षुस्थंकोणकेषुच ६१ वासुदेवादिकान्
हृषीकेशवांतांस्ततःपरं मत्स्यकूर्मवराहांश्चनारसिंहंचवामनं ६२ भा र्गवंराघवंकृष्णंबुद्धं
कल्किनमेवच अनंतंविश्वरूपंचतद्बहिःपूजयेत्क्रमात् ६३ अनंतब्रह्मवायीशानवीशंचाग्नेय
पूजयेत् वारुणींचैवगायत्रींभारतींगिरिजामपि ६४ कोणेषुवीन्द्रवामेतुसौपर्णंपूजयेदपि इं
द्रादींल्लोकपान्विष्यंतान्सभार्यान्सपरिग्रहान् ६५ धूपदीपौततोदत्वानैवेद्यंमूलमंत्रतः अ
नेनक्रमयोगेनजुहुयात्संस्कृतेनले ६६ पुष्पांजलिश्चहोमश्चमूलेनाष्टोत्तरंशतं सकृत्सकृ
त्पुष्पमन्येहोमस्तस्यचगुणः ६७ विसर्जयित्वानैवेद्यंमूलेनत्रिःसमर्च्यच धूपदीपौपुनर्दत्वा
पुनर्मूलेनपूर्ववत् ६८ अर्चयित्वाहरिंध्यात्वाजपेदष्टोत्तरंशतं पुनर्ध्यायेद्धरिंसर्वदेवदेवेश्व
रंप्रभुं ६९ जपध्यानहुतार्चादीनेवंयःकुरुतेसदा धर्मार्थकाममोक्षाणांभाज नंस्यात्सएवहि
७० सर्वोत्तमंहरिंज्ञात्वायएवंभक्तिपूर्वकं जप ध्यानादिभिर्नित्यंपूजयेन्नास्यदुर्लभं ७१ भ

तंत्र० किं कृत्वान्यदेवेषु ब्रह्मरुद्रादिकेष्वपि सर्वोत्कर्षमविज्ञाय विष्णोर्यान्ति नमोक्षकं ७२ न यज्ञानच
४ तीर्थानि नोपवासव्रतानिच दैवतानि च सर्वाणि त्रातुं तं शक्नुयुः क्वचित् ७३ हरिर्हि सर्वदेवानां प
रमः पूर्णशक्तिमान् स्वतंत्रोन्येतद्वशा हि सर्वेतः स जगद्गुरुः ७४ ब्रह्मादयश्च तद्भक्त्या भागिनो
भोगमोक्षयोः तस्माद्ध्येयश्च पूज्यश्च वंद्यो ध्येयः सदा हरिः ७५ इति श्रीतंत्रसारसंग्रहे श्रीमदा
नंदतीर्थभगवत्पादाचार्यविरचिते प्रथमोध्यायः १ हरिः ॐ यस्य कस्यापि मंत्रस्य न्यासः पंचाश
दक्षरैः वीर्यदः के भितो वक्त्र मक्षि कर्णेषु नासयोः १ गंडयोरोष्ठयोर्दंतपंक्त्योर्मूर्ध्नि वाचि च
दोः पत्संधिषु साग्रेषु पार्श्वयोः पृष्ठगुह्ययोः २ तुंदे च हृदि धातुनां सप्तके प्राणजीवयोः सक्ष
कारान्न्यसेद्वर्णान्नृसिंहः स्यस्य देवता ३ जपे न्यासे च विहितः शोधकाणां सदांततः प्राणाया
मो रेचयित्वा पूरयित्वा च कुंभके ४ तारे स्त्रिद्वादशावृत्ते द्व्येकद्वादशकेन वा तत्तन्मंत्रेण वा कार्यो
गायत्र्या दशतारकैः ५ आदावेव जपे कुर्याच्छोषणं दहनं स्तुतिं वाय्वग्निवारुणैर्बीजैर्ध्यात्वा तन्मं ४
उल्लेहरिं ६ एकपंचाशद्वर्णानां चतुर्विंशश्च मूर्तयः आत्माद्या वासुदेवाद्या विश्वाद्या मत्स्यकच्छ

पौ कोलौ नृसिंहः सवटुर्जामदग्न्यरघूद्वहौ वासिष्ठ्यादवौ कृष्णावात्रेयौ बुद्धकल्किनौ ८ शिंशुमा
रश्चेति शतं कलाः कलशनामकाः एताभिः सहितां मूलमूर्तिं कुंभोदके सुधीः ९ पूर्वोक्तविधिनाभ्य
र्च्य प्रतिमा [redacted] शिष्यमेव वा स्नापयेत्पूर्वमर्चायां जपो नूनः सहस्रतः १० मूलमंत्रस्य चां
गानां न्यासः स्नानादनंतरं प्रतिमायां सन्निधिकृद्विष्णोर्माहात्म्यकृद्भवेत् ११ कलशः कीर्तिमायुश्च प्र
भठ ज्ञां मेधां श्रियं बलं योग्यतां पापहानिं च पुण्यवृद्धिं च साधयेत् १२ उपसर्गेषु जातेषु दैवभूतात्महेतु
षु आयुषे वाथ शांत्यै च श्रियै वा पुण्यवृद्धये १३ योग्यतायै मंत्रसिद्ध्यै विष्णोः प्रीत्यर्थमेव वा जुहु
यात्सहस्रमयुतं लक्षं कोटिमथापि वा १४ पूर्ववत्संस्कृते वन्हौ ध्यात्वा देवं जनार्दनं कृत्वा त्रिमेखलं
कुंडं चतुर्विंशांगुलोच्छ्रितं १५ तावत्खातं चतुष्कोणमुच्छ्रितं द्वादशैव वा द्व्यंगुलं त्र्यंगुलं वापि चतुरंगु
लमेव वा १६ विस्तारो मेखलानां स्यादुत्सेधश्चतुरंगुलः चतुर्विंशांगुलं वाथ विस्तारो द्वादशैव वा स्वा
१७ अश्वत्थपत्राकृतिः स्यान्मूलतो द्वादशांगुला योनिः तेच विनताप्रविष्टा द्व्यंगुलं तथा १८ तत्र
त्वनिहरिं ध्यात्वा कुंडे देवीं श्रियं तथा विष्णुवीर्यात्मकं वन्हिं निक्षिपेत्प्रणवेन ह १९ कुर्यात्क्रियाः षो

तंत्र उदग्वक्त्रास्तु तीभिः पृथक्पृथक् वन्हेः स्वदूरेः प्रीतिंकुर्वन्नद्वैर्यजेत्ततः २० आज्येनवापायसे
५ नसमिद्भिः क्षीरिणामथ तिलैर्वातं डुलैर्वापिमधुरैस्त्रिभिरेवच २१ ब्रह्मवृक्षसमिभिर्वासमिन्धि
र्वामतोभ्रवैः अमृताः समिधोज्ञेयाः सर्वत्रचतुरंगु लाः २२ एवमेवचतुर्दीक्षायामाज्येनैवाहुति
क्रिया पूजाचकार्याविधिवत्सर्वसर्वहुतेष्वपि २३ गुरवेदक्षिणांदद्यात्स्वसेजक्षेन्नातस्तु धीः आ
त्मनैवकृतेहेमेशक्तितोगुरुदक्षिणां २४ ॥ ॥इतिश्रीतंत्रसारसंग्रहेद्वितीयोऽध्यायः ॥ ॥हरिॐ
प्रतिष्ठांकारयेन्नविष्णोः कुर्यात्सुप्रतिमांबुधः लोहैर्वाशिलयादारुवामृदावापियथाक्रमम् १ षण्ण
वत्यंगुलांयोगआसीनामथवास्थितां शयानांवामुमुक्षूणां व्याचक्षाणांनिजंस्थितिं २ मुखादू
र्ध्वंत्र्यंगुलोच्चांनवांगुलललस्तुखां सुवृत्तत्र्यंगुलग्रीवामास्तनाच्चषडंगुलां ३ पंचादशांगुलाना
भेरासार्धदशकांगुलां वृषणाद्यामूलतश्चसार्धत्र्यंगुलमायतां ४ तावदागुह्यतोदीर्घांचैसाद्दश
दशांगुलां तथात्र्यंगुलचैसांचद्वाविंशजंघयायुतां ५ आरभ्यगुल्फमेवसहार्धचतुरंगुलां षध्यं
डंगुलोच्चप्रपदांसार्धत्र्यंगुलमेवच ६ प्रपदोच्चयुतामंतेत्र्यंगुलप्रपदोन्नया त्र्यंगुलत्र्यंगुलाम ५

र्धहीनमध्यांगुलामपि ७ त्रिपादांगुलहीनान्यांततस्तादृक्ततस्परां पादोनोच्चांगुष्ठनखांतर
र्धतदनंतरां ८ क्रमशः पादहीनान्यांरक्तपादनखांशुभां विस्तारःप्रपदस्यापिषडंगुलउदा
हृतः ९ अंगुष्ठपरिणाहस्तुचतुरंगुलईरितः त्र्यंगुलस्तुतदन्यस्याद्वीत्यर्धोनाः क्रमात्पराः
१० दशांगुलंजंघमूलंतन्मध्यंत्र्यंगुलाधिकं सप्तादशांगुलंतूर्ध्वंजानुरष्टादशांगुलः ११ ऊर्ध्वं
तोपितथाह्येयोमध्यंद्विर्द्वादशांगुलं चतुरंगुलाधिकंमूलंगुह्यंसार्धचतुष्टयं १२ सार्धत्र्यंपरी
णाहाद्वृषणंचतुरंगुलं सप्तांगुलंपरीणाहाद्धृतंप्रोक्तंसमस्तशः १३ अष्टत्रिंशांगुलः कट्याः परी
णाहउदाहृतः सुवृत्तत्वंतथाश्रोण्योः पीनत्वंचसमस्तशः १४ विस्तारश्चतथाकट्याः सुप्रतिष्ठि
ततोपदेः कट्याश्चैवांगुलाधिकंनाभेरधउदाहृतं १५ नाभिःसार्धांगुलश्चैवगंभीरार्धांगुलो
न्नतः वृत्तःप्रदक्षिणश्चैवद्विचत्वारिंश दंगुलं १६ मध्यंस्तनेपरीणाहः षडंगुलमतोधिकः एको
नविंशांगुलंतदुरोविस्तारलक्षणं १७ पादोनमंगुलंचैवभुजाभ्यांसहसार्धकं अंसयोर्विस्तृति
श्चैवपृथगष्टांगुलामता १८ सप्तांगुलोच्छ्रयः कक्षादुपरिस्कंधयोर्मतः अष्टत्रिंशांगुलंचैवहस्त

रूपलक्षः

त्र· योर्मानमुच्यते १९ अष्टादशांगुलोबाह्वोः परीणाह उदाहृतः क्रमादूनंततस्तेतु सार्धाष्टांगुलमी
६ रितं २० सांगुलः सार्धनवांगुल उदाहृतः समंतदुभयंज्ञेयंतथैवतलविस्तृतिः २१ अर्धां
गुलोन्नतामध्याद्योः सार्धांगुलोन्नता कनिष्ठिकायास्तस्यास्तु व्रीहिमात्राधिकः परः २२
सार्धत्रयपरीणाहौ मध्यज्येष्ठाउदाहृतौ अन्यौव्रीहितदर्धीनावन्या सार्धद्व्यंगुला २३ पादां
गतः परीणाहाः सर्वाज्येष्ठांविनास्मृताः वक्षोविस्तारसदृशः परीणाहोगलस्यच २४ ललां
टकुक्षिकंठास्तुदीर्घरेखात्रयान्विताः वृत्तोगलोबाहवश्चस्तनावंगुलयस्तथा २५ रक्तास्त
लनखाश्चैवनेत्रांतोधरएवच उत्तरोष्ठश्चजिह्वाचनखोपाद्रोनकांगुलो २६ अर्धांगुलौतथा
मध्यावन्येष्टांशक्रमोनकाः नासिकायाअधस्ताच्चनासिकाचरंटिका २७ समामानेनता
सायाउच्चत्वेनैवमापने अर्धांगुलाधिकंसर्वंमुखस्यतुभविष्यति २८ चतुरंगुलंतथैवास्यंसा
र्धव्रीह्यधरंस्मृतं उत्तरंव्रीहिमात्रंतुतदूर्ध्वंचाधरोपमं २९ सार्धांगुलमधःप्रोक्तमधरादध
एवच आस्यपार्श्वद्वयंप्रोक्तमाकर्णात्तुषडंगुलं ३० सप्तांगुलंनासिकायाःपार्श्वमाकर्णतः ६

स्मृतं सपादांगुलमुच्चाचनासिकापरिकीर्तिता ३१ अर्धांगुलेपुटेतस्याःमध्यंचसमुदाहृतं नासि
काव्रीहिविस्ताराचक्षुषीचांगुलित्रये ३२ अंगुलंचैवविस्तीर्णेपुटेर्धंचततदन्यथा चतुरंगुलौभ्रु
वौचैवतथार्धांगुलविस्तृतौ ३३ असंहतौचनिविडौतथापक्ष्मसुनीलकं कर्णौचत्र्यंगुलौसार्ध
द्व्यंविस्तारसंयुतौ ३४ सकुंडलंतावदेवविवरंसम कीर्तितं तथाव्यंगुलविस्तारोलताभ्यांसह
कथ्यते ३५ कर्णपूरयुतौकर्णावुत्पलाभ्यांचसंयुतौ नीलालकसहस्रेणयुक्तंतन्मुखपंकजं ३६
ललाटंतुविशालंचतथासार्धनवांगुलः विस्तारोमूर्ध्नि वृत्तंचशिरश्छत्राकृतिस्मृतं ३७ दीर्घा
श्चकुंचिताग्राश्चनीलकेशाहरेर्मताः मुखमानेनचैवोच्चंकिरीटंकेशवस्यहि ३८ कुंडलेमकराका
रेवक्षश्चैवसकौस्तुभं सश्रीवत्संदक्षिणतःपीनंतुंगमुदाहृतं ३९ हारग्रैवेयसहितमुपवीतयुतं
तथा वाहवश्चसकेयूरकंकणांगदमुद्रिकाः ४० समध्यवंधमध्यंचनितंबेपीतमंबरं कांचीगु
णश्चपद्योर्नूपुरेचातिसुस्वने ४१ अंगुलीयानिचपदोःकृतिभिःसाधुकारयेत् सोत्तरीयंचवक्षा
दिरायुधैश्चसमन्वितं ४२ अनुन्नतैरविद्धैर्दंतैर्युक्तंचसुस्मितं समदृष्टियुतंकार्यंश्लक्ष्णंचैव

प्रति°
७

मनोहरं ४३ प्रतिमार्थं व्रजन्नेवं च ध्वनिभिर्मंगलैर्युतः गत्वा शुचिस्थलं तत्र शिलां चैव परीक्षयेत् ४४
ध्वनिभेदेन विज्ञाय शिलां गर्भवतीं त्यजेत् मूलमंत्रं जपन्विप्रस्संध्यायंस्तिष्ठेदुपोषितः ४५ वार्क्षी
चैव ह्नवृक्षस्य सारेणैव तु कारयेत् बलिदानं च संक्षेपविधानेनैव कथ्यते ४६ अस्य संक्षेपपक्षा
श्रितत्वान्न विस्तारविरोधिता रक्षोपहारं हरयेत् भूतेभ्यो वलिं हरेत् ४७ प्राचीभ्यो विश्वभूतेभ्यो दू
रस्थायिखिलदिक्षु च आरामविश्वभूतेभ्यो लोकपेभ्यस्तथा हरेः ४८ अनुज्ञामुद्धरेद्दक्षां शिलां वा
प्रतिमाकृते प्रतिमां डिंभिकां पीठं शिलाभिस्तु त्रिजातिभिः ४९ स्वरस्थूलत्वभेदेन पुंस्त्र्याद्याजाति
भिः शिलाः । पुंशिलाः प्रतिमार्थं तु स्त्रीशिला पीठकर्मणे ५० वेदमंगलघोषेण वाद्यैस्तस्मान्निमा
हरेत् । प्रागुदक्प्रवणे देशे कुर्याद्देवालयं सुधीः ५१ समावृते दक्षिणतः पश्चान्नैर्ऋत्य एव वा मध्ये
वा ग्रामपुरयोः विशाले सुरुचौ तथा ५२ ऐशानीं दिशमेकां तु विनोदकविवर्जिते जलाशय
समध्ये वा शिलावृक्षादिवर्जिते स्मशानास्तिकदेशानां विदूरे सुमनोहरे ५४ विष्णुद्वारदशातो नू
नं कुर्याद्देवालयस्थलं द्विगुणं चतुर्गुणं वापि ज्ञात्वा किष्कुप्रमाणकं कृत्वा भूशोधनं सम्यक्शा ७

र्धपुंमानतः स्वधः ५५ केशांगारास्थिवल्मीककलोष्टाश्मादिविवर्जिते हरिं तत्रापि संपूज्य वलिंद
त्वापि पूर्ववत् ५६ महाहृज्ञौ लैलीर्हे वा कुर्याद्देवालयं दृढं दीर्घाश्च कलमास्तिस्रस्तिर्यगष्टय
वोदराः ५७ अंगुल्यामध्यरेखायाः समा लक्षणतः स्मृताः स्वांगुल्यामध्यरेखा तु प्रतिमादि
षु लक्षणं ५८ ह्रस्वमध्योच्चभेदेन तत्तन्मानं समस्तशः । प्रादेशहस्तपुरुषमानं सामान्यलक्षणं
५९ प्रतिमाध्यर्धकं द्वारमूर्ध्वमर्धं च विस्तृतिः प्रतिमार्धप्रमाणेन पीठस्योच्चत्वमिष्यते ६० उ
न्नतिः पिंडिकायास्तु चतुरंगुलमानतः । त्र्यंगुलं द्व्यंगुलं वापि गृहांतः प्रतिमासमं ६१ उच्चं पर्य
न्तक्रमशः उच्चत्वं मध्यतः स्मृतं तावदुच्चं बहिश्चैव यद्येकशिखरं भवेत् ६२ अर्धोच्चमथवा
पि स्याद्धस्तात्प्रतिमोन्नतं ततो द्विगुणमानं वा सार्धप्रतिममेव वा ६३ शिखरांतरे तु प्रति
मामानं तद्बलमुच्यते तत्रिपादं तदर्धं वा तदध्यर्धमथापि वा ६४ पद्मसदृशं हस्तिपृष्ठसमं तथा वर्तुलं
चतुरस्रं चाष्टकोणं विमानं परिकीर्तितं ६५ प्रतिमायाः दशगुणं विंशद्गुणमथापि वा वर्तुलं शि
खरं त्वेकं किरीटाकृतिमद्भवेत् ६६ समयापि समे तं वा पृथक् समममथापि वा द्विसमं त्रिसमं वा

त्र·
८ पिसगोपुरमथापिवा ६७ प्राकारवृत्तयुक्तंवासप्तप्राकारमेववा समहस्तंकिष्कुमात्रंवहिर्वाच
तुरस्रकं ६८ ततःपरंकिष्कुमात्रंसभायाअंतरंयदि ततस्तावत्ततीयायाः सार्धमेवमुदाहृ
तं ६९ किष्कुत्रयंचराजादेःस्थानंतद्धनतःस्मृतं ततस्तुमंटपंकुर्यात्त्रतिशायाःसुलक्षणं ७०
पूजयेद्वास्तुपुरुषस्योपरिस्थांस्तुसर्वदा देवान्ब्रह्मादिकान्वास्तुर्वराहस्यहरेःसुतः ७१
पतितोदेवतैर्भूमौचतुरस्राकृतिःस्थितः रू लाशकाशकोष्ठानिमध्येब्रह्मा चतुष्टये ७२ पूज्यो
द्वयेद्वयेशक्रोयमोवरुणएवच सोमश्चपूज्याःकोणेषुवन्हा॰कोणदेवताः ७३ पुनस्त्रयेत्रये पाः
कामंधातारंसविधातृकं स्कंदंचपूजयेत्कोणेसूर्यंचैवविनायकं ७४ कालंकुवेरंचवहिःप्रत्ये
कंदिक्षुपूजयेत् हारिंहरिंगभीरंचगाहनंगहनंगुहं ७५ भानुमंगारकंचैवपूर्वस्यांदिशिपूज
येत् दारुणंविदारिदूतंप्रद्योतंद्योतनंदृतं ७६ मरुंशं नैम्प्रवंचैव [illegible] पूजयेत् दक्षिणस्यांप्र
[illegible] पुष्करंरक्षणंक्षारिंविक्षरंक्षोभणंक्षरं ७७ चार्वंगंभार्गवंचैवपश्चिमस्यांप्रपूज ८

येत् चारंविचारंप्रचरंसंचारंचारणंचरं ७८ वृहस्पतिंवुधंचैवाप्युत्तरस्यांप्रपूजयेत् एवमेवविमान
स्यकृतेःप्रागपिपूजयेत् ७९ सप्तपर्णमयंसाधुकारयेन्मंटपंततः सप्तहस्तंद्विषट्हस्तमथवाद्विगु
णंततः ८० चतुर्गुणंवासम्यक्कुचतुरस्रंसहाजिरं अन्यच्चमंटपंदीर्घंपंचहस्तंतुकारयेत् ८१
त्रिचतुष्कोणकंतत्रमध्येप्रागायतंशुभं कारयेन्मंडलंसाधुहस्तमात्रंसुविस्तृतं ८२ तत्रद्वादश
पात्राणिस्थापयेत्पालिकादिकं पालिकास्तुचतुर्विंशत्यंगुलोच्छ्रयसंयुताः ८३ अष्टादशांगुला
श्चैवतथापंचमुखाइति द्वादशांगुलकाश्चैवशरावाःपश्चिमानुगाः ८४ तत्रविष्णुंचतुर्मूर्तिं
पूजयेच्छक्तितःस्त्रियः सप्तधान्यानितेष्वेवपूरयेदंकुरार्थतः ८५ तत्रनित्यंवलिंदद्याद्विस्त
वेदशरात्रकं ब्रह्मशंकरगीर्वाणपितृगंधर्वयक्षकैः ८६ भूतैश्चपायसेनैवतथापक्वान्नतेनच
अन्नापूपेनपुष्पान्नैरन्नलाजाज्यतैरपि ८७ सक्तुभिश्चक्रमेणैवदेवानांपायसेनवा तद्देवप्रति
मायाश्चकारयेदधिवासनं ८८ पंचग व्येसप्तरात्रंक्षिप्त्वापुरुषसूक्ततः वेदांश्चचतुरःसम्य
सु क्पाठयेद्द्विजोत्तमाः ८९ प्राच्यादिद्वारगोद्वौद्वावेकैकंतुदक्षिणावराः यथालब्धंयथावित्तमथवावि

वै. सा.
९

स्तुतस्तथा: ९० त्रयोदशात्र कुंडानि परितः कारयेद्बुधः उक्तलक्षणयुक्तानि प्रधानं त्वग्निकोण
के ९१ साक्षात्तु कोणगा ह्यस्तमात्रमंतरतः सुधीः आज्याहुतिं तत्र कुर्यात्प्रत्येकं लक्षसंख्यकं ९२
प्रत्येकमयुतं वापि प्रधाने लक्षसंख्यया अर्धं तदर्धमथवा मूलमंत्रेण मंत्रवित् ९३ पंचविंशति
तत्वार्थं प्रधाने जुहुयाद्गुरुः प्रत्येकं तु सहस्रं वा प्रत्येकं शतमेव वा ९४ शतं पुरुषसूक्तेन गायत्र्या च
सहस्रकं कृत्वा जलाधिवासं चतुर्थं वा पंचगव्यतः ९५ चक्राब्जं भद्रकं वापि मंडपे मंडलं शुभं प
दं कृत्वा त्रयं चक्रं राशयो वीथिकालता ९६ शोभोपशोभिकाश्चैव चक्राब्जस्य तु लक्षणं चतुर
स्रं विना चक्रं विशेषो भद्रके स्मृतः ९७ सहस्रमर्धपादं वा कलशांस्तत्र पूजयेत् शतं तदर्धपादं
वा वित्ताभावे निगद्यते ९८ काथेन क्षीरवृक्षाणां तथा पंचामृतैरपि पंचगव्येन शुद्धेन जलेन च
पृथक् पृथक् ९९ पूरयेत्कलशान्मध्यं शुद्धोदेनैव पूरयेत् ब्राह्मस्यैव चतुर्दिक्षु गंधोदानां चतु
चतुष्टयं १०० चतुर्दिक्षाश्रिते पद्मचतुष्के मंडले स्थिते पूर्वादिक्रमयोगेन रत्न
काद्यशुभोदकान् १०१ शुद्धांश्च स्थापयेत् पंचगव्यं शुद्धांतरे न्यसेत् पृथक्चतुर्दलं पद्मं रत्नकं कृत्वा ९

लकं सुधीः पंचाशत्वे तु गंधोदं सर्वमध्ये निधापयेत् ब्राह्मस्य पुरतस्त्वेकं शार्वं संस्थापयेद्वह
त् १०३ अष्टदिक्षु शपद्मेषु पंचकं पंचकं न्यसेत् अनेन क्रमयोगेन कलशा अखिला अपि १०४
तत्र द्रव्यमयास्तत्र तत्र स्थाप्याः स्वकाल्यतः तदेवांकुरपात्राणि परितस्तत्र विन्यसेत् कुशोद
कं चक्रापूरं कौंकुमं चंदनं तथा तुहिनोदं हैरवेरं मोशीरं कोष्ठसारके १०६ नदीसंगमगंवैवन
टाकं कौप्यमेव च निर्झरोदमिति प्रोक्ता विशेषकलशाद्रमे १०७ शुद्धोदद्वयमप्येतन्महातीर्थ
समुद्भवं चतुर्विंशतिमूर्तीनां वर्णमूर्तीस्तथापराः १०८ आवाहयेत्तत्तत्वेनु क्रमव्युत्क्रमत
स्तुताः। वर्णमूर्तीः पुनश्चैव बहिश्चतुर्वीरमेव च १०९ सहस्रकलशादित्वे जपेन्मंत्रांश्च शक्तितः
ततस्तु पंचघोषैश्च वेदघोषैस्तथादरात् ११० आनीय प्रतिमां स्नानं कारयेत्प्रणवेन तु मंत्रैः पु
रुषसूक्तान्तैर्विष्वतश्च स्रुपात्तथा १११ पुनश्चाष्टाक्षरेणैव प्रणवेन तु भक्तितः स्नापयित्वा तां ग
धजलैर्गंधपुष्पादिभिः पुनः ११२ अलंकृत्य स्थापयेत्तु प्रतिमां प्रणवेन तु जपेदष्टाक्षरं मंत्रं तत्त
न्मूर्तिमनुं तथा ११३ अथोत्तरशतं मंत्रोप्याप्येत्तेजोमयीपुनः प्रतिमा प्रतिमां तस्यां तन्मध्ये पर

वै.।.स्ना. मंत्रपु: ११४ चिदानंदरसं सर्वगुणसंपूर्णमुत्तमं पंचविंशतितत्त्वानां देवतास्तदनंतरं ११५ स्थाप
१० येत्प्रतिमामध्ये परितः केशवस्य तु तत्रात्वाहार्षसूक्तं च धर्मसूक्तं च वैष्णवं ११६ सूक्तं च विश्वक
र्मीयं पौरुषं सूक्तमेव च जप्त्वा चैव निजं मंत्रं पुनरष्टाक्षरं सुधीः ११७ प्रणवं च जपेद्धि त्वं ध्यायन्नु
त्तमरूपिणं ततस्तु कलशैर्वार्त्यैः क्रमेणैव जनार्दनं ११८ स्नापयेदुक्तमंत्रैस्तु मध्यमं प्रणवेन तु
अष्टार्णेन निजेनापि तथा पुरुषसूक्ततः ११९ आवाहनं च स्नानं पंचगव्येन मध्यवत् दूर्वाक्षत
रवर्यंतः कलशक्रमउच्यते १२१ जप्त्वा पुनश्च तन्मंत्रान्पूजयेच्च विधानतः द्वारलोकपतिभ्यश्च
बलिं दत्त्वा यथाक्रमं १२२ वस्त्ररत्नहिरण्याद्यैः अलंकृत्य विभूतितः गुरवे दक्षिणां दद्यात्कोटिल
क्षं सहस्रकं १२३ शतमर्धं तदर्धं वा निस्वो भक्त्या प्रसादयेत् तदर्धमल्विजां चैव तदर्धं पारणा कृता
१२४ आश्वभ्य आश्वपाकेभ्यो दद्यादन्नं समस्तनृः पुरस्तात्सरतश्चैव सप्तप्रणवं निरंतरं १२५ सु
ष्याप्याप्याप्या वर्णवस्त्ररत्नाद्यैरागतानपि पूजयेच्छक्तितो भक्त्या प्रीयतां भगवानिति १२६ गीतनृत्यैश्च वाद्यै
श्च पुराणेरितिहासकैः सूक्तैर्मंगलघोषैश्च वैदिकैर्दिनसप्तकं १२७ नयेत्ततो महाराज विभूत्या १०

व्रमपंस्तु धीः कारयेद्देवदेवस्य स्वाध्यायैर्गीतनर्तनैः १२८ महानदीसंगमे तु तीर्थे चातिप्रशस्तके स्ना
८ पयेत्सूर्वमंत्रैः पुंसूक्तान्तैः स्मरन्हरिं १२९ ततः पूर्ववदागत्य प्रवेश्य पुरुषोत्तमं पूजयित्वा विधानेन
दत्त्वा दानानि शक्तितः १३० गुरुश्च भक्त्या संपूज्य स्वीकुर्यादाशिषस्ततः शतप्रस्थादन्नं तु नै
वेद्यं पायसोत्तरं १३१ दिने दिने तेषु दातव्यं सघृतं ससितादिकं पश्चादपि यथाशक्ति पूजा कार्या हरेः
सदा १३१ जीर्णालयोद्धृतौ चैव तल्लमंत्रान्त्वकं तथा प्रातिलोम्येन जप्त्वैवमूर्तौ संकोचयेद्धरिं १३२
उक्तेनैव विधानेन तदर्धैर्विभवैः सुधीः पादमात्रैरपि हरिं स्नापयित्वा यथोदितं १३३ एतेनैव वि
त्युं धानेन कृत्वा देवालयं पुनः स्नापयेत्पुंडरीकाक्षं द्विगुणेन प्रवाहणात् १३४ विभवेनानुलोम्येन ज
पन्मंत्रान्पुनस्तथा आराधयेज्जगन्नाथं ध्यायन्भक्त्या यथोचितं १३५ यात्रापि पूर्ववत्तत्रोत्स
वेषु च सर्वशः कलशोक्तविधानेन पूजा बलिहृतिस्तथा १३६ उत्सवेषु सदा कार्या कलशश्चो
त्सवादनु यात्रास्नानं च कर्तव्यं सम्यगुक्तविधानतः १३७ चोरचंडालपतितश्वोदक्यादिप्रवेश
ने शवाद्युपहतौ चैव पूजाविच्छेदने तथा १३८ स्नापनोक्तेन मार्गेण प्रायश्चित्तकृतिः स्मृता स

वै॰ त्रं॰ वैत्रविष्णुगायत्र्याहोमः स्याद्युताक्षरः १३९ नावाद्यायभिधानानि विद्महे धीमहे तथा प्रचो
११ दयात् तीयाद्यस्तन्नो गायत्रिनामिका १४० दुर्गा शिवस्कंदसूर्यविनायकमुखानपि स्थापयेदुक्त
मार्गेण तत्तन्मंत्रैः स्मरन् हरिं गोलकद्वितयं विष्णोस्त्रितयं वापि कीर्तितं अन्यदेवप्रतिष्ठासु तदंत
श्चिंतयेत्सारिं १४२ विष्णुस्थितिविहीनातु पूजा स्याद्दासुरी तदा गृह्णंति देवता नैतां ततः स्याद्देश
विप्लवः १४३ व्याधिचोरादिभिस्तस्मादंतर्ध्येयो हरिः सदा विष्णुभक्तिविहीनस्य गतिः स्यान्न
शुभा क्वचित् १४४ भक्तस्याप्यन्यदेवेषु तस्माद्ध्येयो हरिः सदा संस्मृतो भगवान् विष्णुः सर्वमंगल
मंगलः १४५ समस्ताभीष्टदायी स्यात्तेन ध्येयोखिलैर्जनैः पुरुषोव्यक्तं च महानहंकारो मनस्तथा १४६
दशेंद्रियाणि शब्दाद्या भूतानां पंचविंशतिः तत्त्वाख्याः कालमाये च नियतिर्मतिरेव च १४७ वि
द्याकलाप्रकृतिश्च द्वात्रिंशत्तत्त्वसंग्रहः मूर्तिः संवित्प्रविष्टा च शक्तिरित्यपराणि च १४८ म
हालक्ष्मीस्वरूपाणि स्युः काद्दश विदो विदुः विष्णोरपि हि रूपाणि तन्नाम्निकाद्दशैव तु १४९ प्रधा
नोपमवर्णानि द्विभुजास्यथशेषतः कृतांजलिपुरान्येव प्रधानं तं हरिं प्रति १५० सर्वाण्येतानि त ११

त्त्वानि ब्रह्मा तु पुरुषः स्मृतः महांश्चाव्यक्तनाम्नी तु ब्रह्माणी संप्रकीर्तिता १५१ एवं वायुरपि ज्ञेयो भा
रती चैव तत्त्वयं रुद्रोहंकार बुद्धिः स्कंदेंद्रौ मन उच्यते १५२ अहंकारः शेषवीन्द्रावपि विद्भिरीरि
तौ दिग्वायुस्तु सूर्यश्च वरुणश्चाश्विनावपि १५३ वह्निर्दक्षाविंद्रस्तु मित्रश्चैव मनुस्तथा इं
द्रियाख्याः च्यावनामा बृहस्पती रुद्रा हृतः १५४ अन्ये तु मनवो वायो रुद्रस्यापि प्रकीर्तिताः एते
षु भगवान् विष्णुः प्रधानतनुरेव तु १५५ ध्येयः परात्मनो मध्ये तत्त्वनामतदर्थयोः जपेन्न्यासेन मों
तस्तु स्वाहांतो होमकर्मणि १५६ त्रिचतुःषड्दशावृत्तिरेतेषां तु हुतादिके न्यासोंगुलीषु रुवाहुम
ध्येषु व्यक्रमे स्मृतः १५७ क्रमे विपर्ययेणाऽत्र शास्त्रादित्वं प्रकीर्तितं ऋषिश्छंदो देवतां गध्या
नानुक्तौ प्रधानवत् १५८ ज्ञेया मंत्राः समस्तास्ते धर्मकाद्यादिदायकाः तंत्रमार्गास्तु हरिणाव्य
संख्याः कीर्तिता अपि १५९ तेष्वयं सुगमो मार्गः सुफलश्चानुतिष्ठतां यावतोप्यनुष्ठानेकर्मप्र
तिर्न विद्यते १६० तावत्समस्तं कथितं मस्मिंस्तंत्रे यथाविधि प्रीयते तेन मार्गेण पूजितो मुक्तिदो
भवेत् १६१ कामदश्च स्वभक्तानां भगवान् पुरुषोत्तमः १६१ ॥ ॥इति श्रीमदानंदतीर्थभगवत्पा

रदाचार्यविरचिते तंत्रसारसंग्रहे तृतीयोऽध्यायः॥ ॥हरिः ॐ अथविष्णु दितेतंत्रगणोह्यियः उदितः
संग्रहेणासावुच्यते खिलसाधकः १ याष्टमस्तु युतोंतेनसमेतश्चैव भूमनः बीजंनमश्च भगवान्
सोदेशोरूपसंयुतः २ सएव तादृशोलोकत्रयपालो भुवःपतेः भावंमेदेहि हांते तुरापयस्वाहयायु
तः ३ मनुस्तस्यापरोनामबीजोदेशनमोयुतः नमःसोदेशभगवानमहाशव्युतश्चसः ४ तादृ
शःस्वाहयायुक्तोवराहस्यापरोमनुः श्यामःसुदर्शनदराभयसव्यदेतोभूम्यासुतोखिलनिजोक्त
परिग्रहैश्च ध्येयोनिजैश्चतनुभिःसकलैरुपेतःकोलोहरिःसकलवांछितसिद्धयेजः ५ वैसवा
नांमुनिर्ब्रह्मामंत्राणांवर्णभेदतः ज्ञेयंछंदोदेवतैकस्ततद्रूपोहरिःपरः ६ प्रणवेनस्वनाम्नाचभू
धरेणपरात्मना सर्वज्ञसर्वशक्तिभ्यांषडंगानिविदोविदुः ७ ज्ञानैश्वर्यप्रभानंदतेजःशक्तिभिरे
वचा पूर्णात्ममध्यगैःसर्ववैष्णवांगान्यथोविदुः ८ त्रिशोदादिःस्वजायायाःकारणंस्वाहयायुतः
श्रीकरोष्टाक्षरोमंत्रोगरुडारूढसंस्मृतिः ९ आदित्यचंद्रावपिचक्रशंखौशांखप्रसूनाख्यनि
धीदधानः चिंत्यःकराभ्यांवसुतर्पयनूत्सःस्वांकस्थलक्ष्मीगरुडांससंस्थः १० ह्रीं भीषयत्रासय १२

चप्रमर्दयतथैवच प्रध्वंसयाथोरक्षेतिपंचांगश्चेदुदाहृतः ११ क्रूरंवीरंदृहद्दिस्तुंदीप्तंतंविश्वतोमुखं
पुंमृगेंद्रंभयकरंशुभंमस्तोश्चमारकं १२ नमाम्यस्वयमित्येष द्वात्रिंशार्णोमनुर्हरेः द्विर्जयस्योपरि
निजंसोदेशंसर्वविन्तथा १३ महातेजोबलंवीर्यंतादृशंस्वाहयायुतं चतुर्विंशाक्षरोमंत्रोनिखिलेष्टप्र
दायकः १४ दिव्यसहेधीमहेपूर्वैस्वयंचैवमहाबलः भेरयेतेन्नदृस्येतन्मध्येनंतःप्रकीर्तितः १५ पा
देर्व्यस्तैःसमस्तैश्चपदैश्चांगंप्रकीर्तितं पूर्वयोस्तत्रपूर्वंतुसर्वत्तेनषडंगकं १६ ततीयंतुद्विगुणवृत्तैः
पादैरंगसमन्वितं ध्यायेन्नसिंहमुरुवृत्तरविं त्रिनेत्रंजानुप्रसक्तकरयुग्ममथापराभ्यां चक्रंद
रंचदधतंप्रिययासमेतंतिग्मांशुकोट्यधिकतेजसमग्र्यशक्तिं १७ सर्वेष्वपिहिमंत्रेषुद्यांघ्य
नंतांतवाहकः चेतनांतस्यमारभ्यसर्वगांतस्वरूपवान् १८ अनंतरूपाधेयोत्रस्वगुरूक्तानु
नृ सारतः यथायोग्यंयथाशक्तितैदायुधभूषणैः १९ शंखचक्रगदापद्मखड्गखेटाःसशार्ङ्गकाःश
रोमुसलवज्रौचहलपाशांकुशौतथा २० श्रूलंचभिंडिं पालंचपद्मसोग्निर्वराभये तर्कमुद्राक्षमा
लाचपुस्तकंचविदारणं २१ इत्यादीन्यखिलान्येवविन्यस्याश्विस्यानिबाहुषु विन्यसद्इतियुग्मार्णोवि

त्र परीतश्चसस्मृतः २२ ससर्गहीनो वेतश्च विंदुहीनोत्तरस्तथा त्रयएतेमहामंत्राः पुरुषार्थचतुष्टये २३
१३ कलारक्षाः प्रियाविष्णोः विशेषज्ञानदायकाः तैरेवतुद्विराद्दत्तैरंगमेषांप्रकीर्तितं २४ श्वासरूपोजपो
नित्यमुभयोर्विहृदस्तयोः एकविंशत्सहस्राणिसषट्शतमहर्निशं २५ अपर्णीयोहरौनित्यंमातर्यो
गोमहानयं। अशेषदोषदहनस्तत्वज्ञानप्रदायकः २६ अष्टैश्वर्यप्रदश्चैवरूनादौसमुपासता तारयोगो
यवमेवप्रसादादेवप्रवर्तते २७ ध्यायेदवींदुकरमिंदुसहस्रलक्षकांतिंप्रियासहितमास्थितमिंदुविंवे
शंखारिदोर्द्वयमुदर्कमहेंदुविंवात्संसिच्यमानममृतेनरमाधिनाथं २८ अंत्यस्वरस्कवर्णावाध्ये
ध्ये योविष्णुःसनातनः विघ्नहृद्णींथवीयः शक्येतः पंचमंत्रयुक् २९ अष्टाक्षरोमहामंत्रस्तैरेवांगैः सम
न्वितः अंत्यध्यानयुतश्चैवनिःशेषपुरुषार्थदः ३० मूलंनःप्रतिषेधश्चसोद्देशोभगवानपि विष्णु
भोज्याधिपः स्वाहायुक्तोष्टादश वर्णकः ३१ अंगानितु सदैवमंत्र चिंतामणिस्त्वयं यथेष्टभ
क्ष्मभोज्यादिदातामुक्तिप्रदायकः ३२ ध्यायेत्सुरद्रुमरविंदतलायताक्षंसौवर्णपात्रदधिभोज्यम
थामृतंच दोर्भ्यांदधानमखिलैश्चसुरैःसमेतंश्रीतांलुमंडलगतंरमयासमेतं ३३ अमृतंस्वयमुद्दे १३

रायुक्तः सत्स्वयोमनुः सतारोष्टाक्षरोंगानिपदैर्व्यस्तसमस्तकैः ३४ उद्यद्रविप्रभमरींदरदौगदां
चज्ञानंचविभ्रमंतेजंप्रिययासमेतं विश्वावकाशमभितः प्रतिदूरयंतंभासास्वयास्मरतवि
ष्णुमनादिवंद्यं ३५ त्रिविक्रमस्तुसोद्देशोविश्वरूपश्चतत्परः विमहेधीमहेविष्णुलंन्नप्रेरए
र: मद्ध्यगः ३६ स्वयमुद्दैरासंयुक्तस्तद्दायुर्णपुरस्सरः सनतिःषडक्षरोमंत्रोवर्णैरंगक्रियामता ३७
अंगारवर्णमभितोंउवहिःप्रभाभिर्व्याप्तंपरश्वधधनुर्धरमेकवीरं ध्यायेदजेशपुरुहूतमुखैस्तु
वद्भिराबीतमात्मपदवीप्रतिपादयंतं ३८ श्यामंरवींद्रमितदीधितिकांतियुक्तंज्ञानंशरंचदध
तंप्रियपासमेतं स्वात्मस्वरूपममितंहनुमन्मुखेषुसंदर्शयंतमजितंस्मरतोरुगीर्भिः ३९ निज
गोत्रंतुसोद्देशंपूर्वाक्षरपुरःसरं नत्यंतंतारपूर्वंचमनुरष्टाक्षरोमतः ४० तेचवीजेवीजमन्तेध
मोदीनामशेषतः एतेविजयदामंत्राज्ञानमोक्षप्रदायकाः ४१ हिरण्यरत्नराज्यादिसमभीष्टसु
रद्रुमाः कृष्णोगोविंदकामेनःसोद्देशोवत्त्ववीजनः ४२ प्रियश्चतादृशाःस्वाहायुगष्टादशवर्ण
कः पदैरंगानिसंप्रीतिकाममोक्षप्रदोमनुः ४३ ध्यायेत्परिन्मणिनिभंजगदेकवंद्यंसौंदर्यसार

त्र॰
१४
मरिशं स्ववराभयाग्निंदोर्भिर्दधानमजितं स्मरसंचभैष्मीसस्यासमेतमखिलप्रदमिंदिरेशं ५४ सका
मः स्वयमुद्देशीनस्यंतोयंषडक्षरः तदादिरपिसर्वेषु चिंतामणिरुदीरितः ५५ इत्यर्थएवमंत्राणां
कलौवीर्यंतिरस्कृतं तत्राप्युद्दीप्तवीर्याहिमंत्राअत्रप्रकीर्तिताः ५६ वाशिष्ठप्रमुखाःप्रवरामंत्रा
स्तत्रापिवीर्यदाः। स्वयंवेदपदारूढः पूर्ववर्णपुरःसरः ५७ नत्यंतोशाक्षरोमंत्रः श्रियोविज्ञान
गोपतेः व्याख्याश्रीसर्वविज्ञानकवितादिगुणप्रदः ५८ वादेविजयदोनित्यं ... थायुक्षेनकेस
री विज्ञानरोचिः परिपूरितांतर्बात्यांडकोशं हरिनोपलाभं तर्कोभयेतंविधिनार्वपूर्वगीर्वाणवि
ज्ञानदमानतोस्मि ५९ ज्ञानानंदपुरः पूर्णोविस्मेहेधीमहेतथा तन्नः शेरणमध्येतुव्यासोमंत्राधि
पाधिपः ५० आदिवीजंस्थिराशेषज्ञानवीजंविमुक्तिदं सर्वपाप ... क्षयकरंसर्वव्याधिविना
शनं ५१ ध्यायेच्छशांकशतकोटयतिसौम्यकांतिंसंसिच्यमानममतोरुघटैः सुरेशैः वर्णा
भिमानिभिरजेशमुखैः सहैवपंचाशताप्रतिगिरंतमशेषविद्याः ५२ सोदेशास्तुस्वयंदीर्घप्र
वीणाद्योनमोयुतः सर्वविद्याप्रदोशार्णः प्रतिवादिजयप्रदः ५३ विमुक्तिसाधनः कीर्तितु १४

क्षिस्थैर्यप्रदः सदा वंदेतुरंगवदनंशशिबिंबसंस्थं चंद्रावदातममृतात्मकरैः समंतात् अंडांतरंबहि
रपिप्रतिभासयंतं शंखाक्षपुस्तकसुबोधयुताब्जबाहुं ५४ नत्तोमुखादपिनिरंतरमुद्गिरंतंविद्या
अशेषततउत्ताश्रभवेशमुख्यैः संसेव्यमानमतिभक्तिभरावनम्रैः तस्माम् तेनसततंपरिषिच्यमा
नं ५५ स्वयमुद्देशवानूपूर्ववर्णपूर्वोनमोयुतः सतारोष्टाक्षरश्चैवनवार्णश्चमनूत्तमौ ५६ प्रो
द्यद्दिवाकरसमानतनुंसहस्रसूर्योरुदीधितिभिराप्तसमस्तलोकं ज्ञानाभयांचितकरंकपिलंचदे
दि
वंध्यायेदजा ... समभिज्ञिंप्रतिवोधयंतं ५७ अध्यष्यताज्ञानमोक्षप्रदोभक्तेष्विमौसदा सत्कर्दीर्घ
नमोदष्टविलोर्नुकमितिप्रभोः ५८ सर्वार्थदंगार्क्षमदंयोजातइतिचापरं वासिष्ठंचपरोमात्रये
तिज्ञानविमुक्तिदं ५९ भौमनीयंसर्वकाममोक्षदंयदमेत्स्यपि। एवमेवाखिलावेदाज्ञातव्या विमु
तसराः ६० स्वरष्टंसक्तमखिलकामदंहरितुष्टिदं। वाचोभिप्याः श्रियोंगानिश्रीर्लक्ष्मीर्मेदिरारमा
६१ कौशेयपीतवसनामरविंदनेत्रांपद्मद्वयाभयवरोद्यतपद्महस्तां उद्यच्छतार्कसदृशींपरमांक
संस्थांध्यायेद्विधीशनतपादयुगांजनित्रीं ६२ लज्जावीजंचतद्वीजंतस्याएवाभिधायकं पाशांकु

मं॰ त्र॰ शौरक्तवस्त्रं ल ज्ज्वावीजे विशिष्यते ६३ अमध्ययुग्मस्वरगतेनैवांगमुदाहृतं सत्ताबीजं चतुर्बीजं
१५ तद्दैवप्रकीर्तितं ६४ वर्णः श्यामो विशेषोत्र तांबूलं नीलमुत्पलं चक्रशंखोत्तर्जनं च वरहस्तमिस्य
परत्र च ६५ नमोंतः स्वेन सहितस्तद्देवान्योमनुः स्मृतः दुर्गा त्रिष्टुप्कश्यपोक्तातत्र वर्णाग्निवत्स्मृ
तः ६६ त्रिनेत्रत्वं च दुर्गायाः प्रायः सर्वं त्र कथ्यते पादैः समस्तेनन्तथाषडर्णे नां गमुच्यते ६७
रमायाएवरूपाणि त्वेतानि हि विदो विदुः मुख्यतो जामदग्न्यस्तु देवतास्य मनोः स्मृतः ६८ हिर
ण्यगर्भसूक्तं च भृगुदृष्टं प्रकीर्तितं ब्रह्मधातृविरिंचाजपाद्यैरंगमुदाहृतं ६९ ध्यायेन्निषण्णमज
मच्युतनाभिपद्मेद्योयद्दिवाकरसमूहनिकाशमग्र्यं मातृप्रकारकरमुत्तमकांतिमद्भिर्वक्त्रैः सृजंत
मखिलैः परमार्थविद्याः ७० स्वयमुद्देशनतिमां तस्य पंचाक्षरो मनुः स्वयमेवापरो ष्टार्णस्ता दृशः
संप्रकीर्तितः ७१ वलाद्यं भृगुणा दृष्टं प्राणाग्नेः सूक्तमुच्यते प्राणाद्यैः पंचभिस्तस्याप्यंगान्युक्तानि
सूरिभिः ७२ उद्यद्रविप्रकरसंनिभमच्युतांके स्वासीनमस्य नुतिनिस्सवचः प्रवृत्तिं ध्यायेद्गदाभ
यकरं सुकृतांजलिं तं प्राणं यथेष्टतनुमुन्नतकर्मशक्तिं ७३ प्राणाद्याः पंचमंत्राश्च तस्य देवस्य १५

वाचकाः उच्यते हरिरप्येतैः साक्षान्नारायणादिकः ब्रह्माण्या अपि भारत्या गौरी यस्तद्गतिश्च ते
मंत्रौ ह्रीं धैतमोरदृशौ सर्वाभीष्टप्रदायकौ ७५ उद्यद्दिवाकरसमूहनिभां स्वभर्तुरंकस्थितामभय
मद्रवाहुयुग्मां मुद्रां च तत्वदृश्यैवरपुस्तकं च दोर्युग्मकेन दधतीं स्मरतात्मविद्यां ७६ या॰
दैर्व्यस्तैः समस्तैश्च तदंगानि विदो विदुः स्वयमुद्देशनस्तौ मंत्रौ द्वाव परौ तथाः ७७ मंत्रा
एते हरेः प्रीतिदायकाः सर्वकामदाः इष्टदैवं हरिः साक्षाल्लक्ष्मीर्भाग्याधिदेवता ७८ गुरुर्ब्रह्मा
थवा युर्वा विद्यादेव्यौ प्रकीर्तिते तस्मादेते प्रियाविष्णोरंतरंगतया सदा ७९ ज्ञेयाश्चैव प्रयुज्या
श्च विष्णोः प्रीतिमभीप्सया उद्देशनतिमुद्धृत्य त्रः स्वयमेव शिवस्य तु ८० वर्णैरेतैस्तदंगानि वाम
देवो मुनिः स्मृतः पंक्तिश्छंदार्थी विज्ञाने न हि छंदस्ति संशयः ८१ ध्येयः पंचमुखो रुद्रः स्फटिकाम
लकांतिमान् विद्युज्जाभाशितरजः श्यामान्यस्य मुखानि च ८२ जटावबद्धेंदुकलः प्रियायु
क्तागभूषणः मंत्रेष्वेतेषु सर्वेषु वाच्यस्तारेणकेश्चावः ८३ अंतर्यामी तथा ध्येयः सर्वदेवेषु सर्व
दा स एव वनितालिंगः पार्वत्यामनुरुच्यते ८४ गौरी वराभयकरा ध्येया पीतांबरा च सा श्रि

तंत्र स्वयमुद्देशनत्संतः पूर्वपूर्वःषडक्षरः ८५ सनत्कुमारदृष्टोयंमंत्रःशेषस्सकामदः दधानोहल
१६ सोनंदोश्वेतवर्णःकृतांजलिः ८६ सहस्रमूर्धात्वद्वितीयकर्णेभूषःप्रियायुतः वनमालीनील
वासाध्येयोविश्नोस्तुरुक्षतः ८७ व्यसस्तपक्षितारौचस्वाहांतोगारुडोमनुः काश्यपोस्यमुनि
र्ध्येयःसुधापूर्णहिरण्मयं ८८ दधानःकुंभमभयंपीतशुक्लारुणोहरिः ह्रस्वश्चाजानुवोनाभेः
कंठात्कात्स्तएवच ८९ प्रियायुक्पुरतोविश्नोःपक्षतुंडसमन्वितः जंगमस्थावरविषहृद्यंस
र्वकामदः ९० मंत्राश्चलोकपालानांनमोंताःसर्वकामदाः नीलरक्तासितश्वेतरक्तशुक्लाश्च
वर्णतः ९१ सप्रियाःसाभया वज्रशक्तिदंडासिपाशिनः गदाकुसुदशूले श्चिरवड्गिनोभूष
णोज्वलाः ९२ अग्निश्चसयमुद्देशीसम नःस्कंदवाचकः कौशिकोस्यमुनिर्वन्हिवर्णःषण्मुखउ
ज्वलः ९३ धनुःशक्तिधरोध्येयःकामदोभयनाशनः ह्रस्वःकृपालुःस्वेतश्चसयमन्यःस्वयंतथा
९४ सत्तारोष्टाक्षरः सौरःक्रमस्युत्क्रमतःपदैः अंगानिपद्मयुगलधरोध्येयोरुणोरविः ९५ १६
सर्वव्याधिहरःश्रीदोवशिष्टोयंमनुःस्मृतः मोनयदासाप्तप्राप्तिप्रसन्नोविघ्नराण्मनुः ९६ रक्ता

वरोरक्ततनुरक्तमाल्यानुलेपनः महोदरोगजमुखःपाशदंतांकुशाभये ९७ विघ्नध्येयोविघ्नहरः
कामदस्त्वरयात्ययं तत्रतत्रस्थितोविश्नुस्तत्तच्छक्तीःप्रबोधयन् ९८ एकएवमहाशक्तिःकुरुते
सर्वमंजसा स्वयमुद्देशवानूर्वर्णपूर्वोहृदयसंयुतः ९९ धा न्वंतरोमहामंत्रःसंसृतिव्याधिनाश
नः अत्रोक्तसर्वमंत्राणांनायकोपलसंनिभः १०० चंद्रौघकांतिममृतोरुकरैर्जगंतिसंजीवयं
तममितात्मसुखंपरेशं ज्ञानंसुधाकलशमेवचसंदधानंशीतांशुमंडलगतंस्मरतात्मसंस्थं
१०१ मूर्ध्निस्थितादमुतएवसुधांस्रवंतंभ्रूमध्यगाच्चततएवचतालुसंस्थात् हृद्दाच्चनाभिसदना
द्धरस्थिताच्चध्यात्वाभिपूरिततनुर्दुरितंनिहन्यात् १०२ अज्ञानरोगभयदुःखमहाविषाणियो
गोयमाशुविनिहंतिसुखंचदद्यात् उन्मादविभ्रमहरः परतश्चसांद्रमानंदमेवपदमापयतिस्मनि
त्यं १०३ ध्यात्वेवहस्ततलगंस्वमनेन्स्रवंतं देवंस्वमस्यशिरसिस्वकरंनिधाय आवर्तयेन्मनुमिमं
सच वीतरोगःपापादपैतिमनसायदिभक्तिनम्रः १०४ शतंसहस्रमयुतंलक्षंवारोगसंक्षयात्
इममेवजपेन्मंत्रंसाधुनादुःखशांतये ज्वरदाहादिशांत्यर्थंतर्पयेन्मनुनामुना ध्यात्वाहरिंजलेस

श्रि

तं.त्र. तराज्ञातमूर्तिर्विनश्यति १०६ अयुतामतसंख्योमाभ्रोपतस्तीरसंयुतात् सर्वेरोगाविनश्यंति
१७ विमुखोनहरेर्यदि १०७ भक्तामिचारसंगात्यर्थमंमार्गाहुतिक्रिया द्विगुणामतयावश्याकेवलेनर
तेनवा १०८ आयुर्विवर्धयेत्निसंजन्मनक्षत्रएववा चतुश्चतुर्भिर्दूर्वाभिः क्षीराज्याक्ताभिरिष्यते
१०९ सर्वक्रियाहरौभक्तेहरिभक्तैः स्वनुष्ठिताः गुरुभक्तैः सदाचारैः फलंत्यद्धानचान्यथा ११० ब्र
ह्मांतागुरवश्चैवसंप्रदायप्रवर्त्तकाः तत्तद्गुणानुसारेण पूज्यामान्याश्चसर्वेशः १११ सर्वेभ्यो
प्यधिकाभक्तिर्विष्णोस्यादितिनिश्चला लक्ष्मीप्रसादिपुततक्रमेणस्यात्तुभाविता ११२ एवंवि
द्याः फलिष्यंतिनान्यथातुकदाचन शुभान्ध्यायंतियेकामानगुरुदेवप्रसादजान् ११३ इतरा
नात्म [redacted] पापोत्थांस्तेषांविद्याफलिष्यति मुक्तावपिस्वसंसारेना
त्मनोविस्मृतांक्वचित् ११४ ब्रह्मरुद्रादिभावंवासाम्यंवाधिकमेववा अतद्गुणमथवायः स्मरेत्स
तुसिद्धिभाक् ११५ नान्यथासिद्धिमाप्नोतिकल्पकोटिशतैरपि स्मृत्वागुरुंपूर्वगुरुमादिमस्त
गुरुंतथा ११६ देवतांवासुदेवंचविद्याभ्यासीतुसिद्धिभाक् अवज्ञानागुरूणांचदेवतानांनसिध्य १७

ति ११७ प्रयातिचतमोघोरंमंत्रावज्ञाकृदेवच यस्मात्तस्यवेतास्याद्गुरूणांदेवतास्वपि ११८ भ
क्तिमान्गुरुदेवेषुतद्भक्तेषुचसिध्यति गुरुदेवप्रतीपानांविमुखत्वंप्रियेरतः ११९ अकामक्रोध
लोभश्चनचिरात्सिद्धिमाप्नुयात् सकामेभ्योमितगुणायाकामेत्तत्कृताक्रिया १२० तस्मादकाम
वालंभजेद्दृष्टंसनातनं अयंमेहस्तइतिचमंत्रः पूर्वोक्तवत्स्मृतः १२१ अत्रोक्तास्तुक्रियाः पूर्वमंत्रे
ष्वपुपलक्षणं विजयस्तंभनादीनिनारसिंहैर्विशेषतः १२२ जामदग्न्येस्तुकार्याणिराघवैर्यादवै
रपि वाराहैः स्तंभनंक्षिप्रंश्रीकराः कथिताः पुरा १२३ बहुबाहुंमहाकायमुद्यत्कंचोद्यदायुधं स्मर
न्विजयमाप्नोतिस्तंभनादींश्चकारयेत् १२४ वसुपूर्णकरंरत्नपर्वतस्थंविभावयन् वसुसिद्धिमवा
प्नोतिसेव्यमानमजादिभिः १२५ श्रियाविभूतिभिर्युक्तंभावयन्भूतिमाप्नुयात् यद्यन्मनोगतंत
त्तत्तदाप्नोत्यसंशयं १२६ तथात थाहरिंध्यायन्क्रियास्तास्ताश्चसाधयन् श्रियेपद्मानिजु
हुयात्संप्रीत्याउत्पलानिच १२७ शत्रून्जयायजुहुयादभिमंत्र्यप्रयोजयेत् विद्यायेमंत्रितंवारीव
चांवातुलसीमपि १२८ ब्राह्मीघृतंसुवर्णंवाशतादृत्यानुनित्यशः अकुर्वंश्चक्रियाभक्तयानि ष्पेक्षो

त.सा भजन्हरिं १२९ सर्वमेतस्वाप्नोतिविशेषेणनसंशयः सृष्टिस्थितिलयन्यासाःप्रातिलोम्यानुलोम
१९ तः १३० स्थितसंताएववर्णानांश्रेष्ठाएवंचतुर्दश संहृत्संतामोक्षिणांतुएकविंशतिरेववा १३१ पार
त्तकेवुनाभ्यास्यपुतंचसललाटकं सनासिकाद्दग्जान्वोश्चसश्रोत्रंसोरुकंतथा १३२ सोरस्कंच
सकंठंचसभुजद्वयमेवच सगंडयुग्मंसालीकंसतुंदंक्रोडकंतथा १३३ समूलंचसगुल्फंचसपा
र्श्वद्वयमेवच सदोर्द्वयंव्यापकंचगलपार्श्वद्वयेनच १३४ ककुदास्तनद्वयेनापिपृष्ठमूलेनसर्वशः
न्यासोयथाक्रमंप्रोक्तोमंत्रेष्वेतेषुकृत्स्नशः १३५ प्रतिमायामात्मनि चन्यासोयंसंनिधानकृत् वी
जांतःसाध्यमध्यंचविभक्तद्दलमंत्रयुक् १३६ वर्णानुप्रातिलोम्येनहतंश्रूपुरसंयुतं बीजसंदृब्ध
कोणंचयंत्रंरक्षादिसाधकं १३७ समंतत्सर्वमंत्रेषुजप्तंधार्यंतुवाभुवि विलिख्यमंडलेवातस्ज
येद्धरिंजसा १३८ प्रतिमोक्तलक्षणैर्यावयुक्तआचार्यउत्तमः सर्वविन्तपसायुक्तआज्ञावान्भक्ति
युक्तोहरेः १३९ यावद्भक्तोयथालक्ष्यैर्गुणैर्युक्तोथवैसवः गुरुःसक्तंप्रदायज्ञस्तारतम्येनतस्थि
स्थिरः १४० उत्तमाद्दुत्तमासिद्धिर्धर्ममोक्षादिषुस्फुटं तस्मादुत्तमआचार्यंलब्धेनातोवरंव्रजेत् १४१ १९

...वः... ...णानितानि त्रिकोणान... ...षडस्रवायो द्विस्तावरस
एकस्यशिष्यतांप्राप्यतदाज्ञानविनाससं अवरंवाव्रजेद्दुःखगुणश्चैनैवदुष्यति १४२ विशेषतोगुण
श्चस्मादेवेशयेवमेवहि तस्मादुत्तममाचार्यंदेवेशंचाश्रयेद्धरिं १४३ अपरोक्षदृशेरेवय स्मान्
मोक्षोनचान्यथा अपरोक्षदृष्टिश्चैवश्रवणान्मननाद्दृशु १४४ सम्यङ्निश्चिततत्वस्यनिदिध्यास
नयाभवेत् द्विविधासाचसंप्रोक्ताविसुज्ञास्वावमर्शनं १४५ एकंध्यानंहरेरन्यच्चत्वार्यंगानितः
स्यच यमाश्चनियमाश्चासाःप्राणायामस्तथेरिताः १४६ अहिंसासत्यमस्तेयंब्रह्मचर्यापरिग्रहो
यमाःशौचंतपस्तुष्टिःस्वाध्यायोहरिपूजनं १४७ नियमा वीरपद्मेचस्वस्तिकाद्यानिचासनं रेचकः
पूरकश्चैवकुंभकश्चत्रिधास्मृतः १४८ प्राणायामःस्मृतिविक्षोपविनानियमउच्यते अधीतिःस्म
तियुक्तातुनिदिध्यासनमेवहि १४९ प्राणायामेपिविक्षेपार्थंस्मरणंध्यानमेवच आसा वंप्राणा श्री
यामानियपरिग्रहपूर्वकाः १५० तपआद्याःक्रमात्सर्वेउत्तरोत्तरतोधिकाः सर्वतःश्रवणाद्यास्तुमु
ख्यामुक्तिप्रसाधने १५१ अज्ञस्यश्रवणंश्रेष्ठमयुक्तेर्मननंतथा ध्यानंनिश्चिततत्वस्यतस्माद्धा
स्त्रावमर्शनं १५२ वरंदशगुणंतस्माद्ध्यानमेकस्यशतोत्तरा अपरोक्षदृशाप्येषाकर्तव्याविसुत

मंत्र॰
२९

ष्टिदा १५३ यइमंपरमंगुह्यंमद्भक्तेष्वभिधास्यति भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयः १५४
नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः भविताानचमेतस्मादन्यः प्रियतरोभुवि १५५ श्रोत्रास
नेलंगमात्रंनपृथग्धर्मकारणं प्राणायामास्यत्वष्टिपर्यंता द्विगुणाधिकाः ५६ स्वाध्यायोनं
कोटिगुणस्ततोनंतगुणाहरेः पूजातद्विगुणंध्यानमितिधर्मक्रमःस्मृतः १५७ ऊर्वोरधःपदोरू
र्ध्वंविभागेनेतिचत्रिधाआसनत्रयमुद्दिष्टंमंत्रस्मरणपूर्वकं ५८ द्विगुणोत्तरंरेचकादिषोडशा
दिक्रमेणतु मंत्राणांह्रस्ववर्णस्यकालोमात्रेतिशब्द्यते १५९ क्रमेणेवाभ्यसेन्मात्रावृत्तिमेका
ग्रधीः पुनः रेचयित्वादक्षिणतःपूरयित्वाचवामतः १६० कुंभकश्चसुषुम्नायांविष्णुंवायुं चसं
स्मरेत्मूलाधारंसमारभ्यत्वामूर्धानमस्तुस्थिता १६१ मध्येसुषुम्नाविज्ञेयावज्रिकार्यप्रकाश
नी वैद्युतान्नतनाडीतिसैवपंचप्रभेदिनी ६२ पृथ्वामागरक्षांतभेदास्तेचक्रमेणतु हरिनीलः
सितःपिंगोलोहितश्चात्रकेशवः १६३ प्रद्युम्नादिस्वरूपेणध्येयःसिसिमभीप्सता मूलेचना
भौहृदयेकंठयोनि भ्रूमध्यमूर्धद्विषडंतकेषु चतुःषडष्टद्विचतुर्दिषड्कदलेषुपद्मेषुसिताह्णेषु १६३

पंचात्मकोसौभगवान्सदैवध्येयोहृदंतान्यरुणानितानि त्रिकोणवन्हौचषडस्त्रवायौद्विस्तावदस्र
रविवृत्तशशित्रिवन्हौ १६४ इत्येविधाव्यपिविचिंत्यमिदंस्वार्धरूपंसितंतदखिलंहृदयासरस्थं
इडाचपिंगलाचैववज्रिकाधारणीतथा सुषुम्नायाश्चतुर्दिक्षुवज्रिकायासुतत्रच ६६ चतुर्मू
र्तिःसभगवान्हृदयेसंव्यवस्थितः द्वासप्ततिसहस्राणिनाड्योनात्तुप्रधानत १६७ इह ती
सहस्रस्पर्शानामश्चांवाचोत्रकेशवः रूपाणांलक्षणंतेषांरहस्यत्वान्नकथ्यते १६८ विष्णुनात्र
त्वणेप्रोक्तंग्रंथ संकोचतस्तथा खंडस्मृतिर्धारणास्मादखंडाध्यानमुच्यते १६९ अभयत्वा
त्समाधिस्तुदर्शनंचियानया अथवासततंशास्त्रविमर्शेनभविष्यति १७० परमस्नेहसंयुक्त
यथार्थज्ञानतोभवेत् साभक्तिरितिविज्ञेयासाधनंभोगमोक्षयोः १७१ मुख्यमेषैवनान्यासा
सर्वंव्यर्थंतयाविना सैकाम्यभीष्टफलदामोक्षोदर्शनयुक्तया १७२ दर्शनंचतयाहीनंव्यर्थम
न्यत्किमुच्यते योग्यंतुदर्शनंनैवतयाहीनंभविष्यति १७३ आनंदवित्सदितिपूर्वगुणैःस म
सैमर्त्यादिभि विधिपरै भगवान्क्रमेण ध्यातोधिकैरपिगुणोधिकमेवसौख्यमुक्तौददाति

तंत्र॰ सततंपरमस्वरूपः १७४ निःशेषाखिलसंपूर्णगुणेनहरिणास्वयं ब्रह्मणेकथितातंत्रसारादु
२० द्धृत्यसारं ७५ आनंदतीर्थमुनिनाकृतोग्रंथोयमंजसा ग्रंथोयंपाठमात्रेणसकलाभीष्ट
सिद्धिदः ७६ किमुज्ञानानुष्ठानाद्भयस्मात्पुनः किमु १७७ यस्यत्रीण्युदितानिवेदवचने
रूपाणिदिव्यान्यलं बट्तद्दर्शितमित्थमेवनिहितंदेवस्यभर्गोमहत् वायोरामवचोनयंप्रथमकं
पृक्षोद्वितीयंवपुः मध्वोयत्तुतृतीयमेतदमुनाग्रंथः कृतः केशवे १७८ अशेषदोषोज्झितपू
व र्णसद्गुणंसदाविशेषापेतगतोरुरूपं नमामिनारायणमप्रतीपंसदाप्रियेभ्यः प्रियमादरेण
१८० ॥ ॥इतिश्रीमदानंदतीर्थभगवत्पादविरचितेश्रीमत्तंत्रसारसंग्रहेचतुर्थोध्यायः
४ ॥ ॥ श्रीरामचंद्रायनमः ।विक्रमार्कगतेकालेपंचसप्तध्रतिप्रमिते विरोधाद्देपौष
शुद्धे त्रयोदश्यांशनिदिने १ ॥ ग्रंथसंख्या ६७५॥